भावः। आत्मव्यतिरिक्तजीवसद्भावे प्रमाणाभावात्। 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति' (श्वे. ४. ६) इति श्रुतिरात्मद्वयसद्भावे प्रमाणमिति चेद्, न। विकल्पासहत्वात्। तथाहि —इयं श्रुतिर्जीवपरयोर्भेदं प्रतिपादयति वा न वा। नाद्यः, अद्वैतभङ्गप्रसङ्गात्। नापि द्वितीयः, आत्मद्वयसद्भावे प्रमाणाभावप्रसङ्गात्। ननु कल्पनानिर्मित एव भेद इति नाद्वैतहानिः, नापि पूर्वोक्तवेदनाननुसन्धानदोषानुषङ्ग इति चेद्, न। कल्पनामात्रनिर्मितस्य भेदस्य प्रामाणिकव्यवस्थाहेतुत्वानुपपत्तेः, अन्यथा कल्पनानिर्मितरजतश्रमेण शुक्तिशकलेनापि कटकमकुटादिनिर्माणप्रसङ्गात्। तस्माद् 'एको देवः सर्वभूतेषु गूढः' (श्वे. ६. ११), 'एक एव च भूतात्मा भूते भूते व्यवस्थितः' (ब्रह्मबिन्दुः ११) इत्यादिश्रौतस्मार्तवचनानि प्रमाणान्तरविरोधाद् न यथाश्रुतेऽर्थे प्रमाणम्। सहस्रसंवत्सरसत्रवाक्यवत्। तत्र हि कर्तव्यत्वप्रतिपादनविरोधात् सहस्रसंवत्सरपदं सहस्रदिवसपरतया व्याख्यातमाचार्यैः। तत् सिद्धमात्मा प्रतिक्षेत्रं भिन्न इति।

**ननु** कथमात्मनो विभुत्वम्। श्रूयताम्। युगपदेव *चरणशिरसोः कण्टकविद्धस्य समकालमेव वेदनाद्वयानुसन्धानदर्शनादणुत्वं तावदनुपपन्नम्। मध्यमपरिमाणत्वे तु शरीरतुल्यपरिमाणत्वमङ्गीकर्तव्यम्। अधिकपरिमाणत्वे शरीरान्तःप्रवेशाभावप्रसङ्गात्। न्यूनपरिमाणत्वे तु शिरःपादवेदनयोर्युगपदनुसन्धानाभावप्रसङ्गस्य तादवस्थ्यात्। तर्हि शरीरपरिमाणत्वमेवास्त्विति चेद्,

---

* द्वित्वस्फुटतार्थमेकवद्भावो न कृतः कर्तव्योऽपि।

DR RUPNATHJI(DR RUPAK NATH)

मैवम् । गजादिगतस्यात्मनः पिपीलिकादिदेहानुप्रवेशाभावप्रसङ्गात् । तस्मात् पारिशेष्यसिद्धं विभुत्वम् । 'तेनेदं पूर्णं पुरुषेण सर्वम्' (श्वे. ३. ९) इत्यादिभिः श्रुतिभिश्च विभुत्वसिद्धिः । नित्यत्वं पुनः 'अविनाशी वा अरे अयमात्मा' (बृह. ४. ५. १४) इत्यादिश्रुतेरनवयवद्रव्यत्वाद् विभुत्वाच्च गगनादिवत् साधनीयम् । ननु कौ पुनः स्वर्गापवर्गौ नाम । लौकिकेषु सुखदुःखेष्वेव स्वर्गनरकादिव्यपदेशः । मोक्षस्तु शरीरविपर्ययसदृक्ष इति देहात्मवादिनश्चार्वाकस्य मतम् । तत्तु देहव्यतिरिक्तात्मसद्भावप्रतिपादनेन निरस्तं वेदितव्यम् । सौगतास्तु नीलपीतादिविषयोपधानविलये सति निरुपधानस्य बोधस(न्धा ? न्ता)नस्य स्वरूपेणावस्थानं मोक्षमाचक्षते । तदयुक्तम् । निर्विषयस्य स्वयमवस्थानानुपपत्तेः । निरन्तरमुपजायमानेषु विन(श्व ? श्य)त्सु च बोधसन्तानेषु कस्यापि मोक्षफलानुभवानुपपत्तेः, मुक्तेरपरपुरुषार्थत्वप्रसङ्गाच्च । एकविंशतिप्रभेददुःखोच्छेदो मोक्ष इति तार्किकाः कीर्तयन्ति । देहः, षडिन्द्रियाणि, षड् विषयाः, षड् बुद्धयः, सुखं, दुःखं चेत्येकविंशतिप्रभेदं च दुःखमाचक्षते । तत् सुखस्यापि विनाशेन मुक्तेरपरपुरुषार्थत्वप्रसङ्गादुपेक्षणीयम् । न च सुषुप्तेरिव मुक्तेरपि दुःखाभावमात्रेण समीहितत्वमिति वाच्यम् । दुःखाभावसमीहितस्याल्पविषयत्वाद्, अन्यथा विस्मृत्य सुप्तोत्थितस्य दुःखाभावेऽनुसन्धीयमानेऽपि कामिनीसम्भोगादिसुखलवलोपनिमित्तदुःखानुषङ्गाभावप्रसङ्गात् । तस्मात् स्वर्गादिसुखमुन्मुच्य मोक्षमात्राकाङ्क्षा न मोक्षस्य दुःखाभाव(प्रसङ्गमात्ररूपस्व ? मात्रस्वरू)पत्वे सम्बोभवीति । एतेन (स खलु ?

DR.RUPNATHJI( DR.RUPAK NATH )

निषिद्धकाम्यकर्मभ्यः सम्यग् व्यावृत्तचेतसः ।
नित्यनैमित्तिकप्रायश्चित्तप्रध्वस्तदुष्कृतेः ॥ २७ ॥

सुखदुःखानुभूतिभ्यां क्षीणप्रारब्धकर्मणः ।
युक्तस्य ब्रह्मचर्याद्यैरङ्गैः शमदमादिभिः ॥ २८ ॥

कुर्वाणस्यात्ममीमांसां वेदान्तोक्तेन वर्त्मना ।
मुक्तिः सम्पद्यते सद्यो नित्यानन्दप्रकाशिनी ॥ २९ ॥

सुखाद्यापरोक्ष्यसाधनेन्द्रियत्वेन कल्प्यमन्तरिन्द्रियं विभुपरिमाणमस्पन्दं च मनः । अणुपरिमाणं त्वचलं च मन इति केचिदूचिरे । तदसङ्गतम् । 'मनो विभु स्पर्शानर्हद्रव्यत्वाद् अनारम्भ्यारम्भ(क)द्रव्यत्वाद् वा ज्ञानासमवायिकारणसंयोगाधारत्वाद् वा आत्मवद्' इत्यादिभिरनुमानैर्महत्त्वसिद्धेः । सिद्धे विभुत्वे चाकाशादिवदस्पन्द(त्व)कत्वमपि न पृथक् साध्यम् । ननु धर्मिग्राहकप्रमाणबाधितान्यनुमानानि । तथाहि— विभुनो मनसोऽनुपहितत्वे गगनादिवदिन्द्रियत्वायोगादुपाधिर्वक्तव्यः । तत्र श्रोत्रादीनामिव मनसः शरीरैकदेशोपाधित्वं नोपपद्यते । तदवयवनिरोधे मनोनिरोधप्रसङ्गात् । नापि (स)कलशरीरोपाधित्वं, वेदनाविज्ञानसाधनस्यात्ममनःसंयोगस्य सार्वत्रिकत्वेन पादादिगतायाः कण्टकादिवेधवेदनायाः सकलशरीरव्यापित्वप्रतीतिप्रसङ्गात् । अणुत्वाश्रयणे तु तत्तद्देहावयवगतात्ममनःसंयोगविशेषवशादुपपद्यत एव वेदनायास्तत्तदधिकरणत्वप्रतीतिरिति मनोग्राहकमेव प्रमाणमणुत्वमपि गृह्णातीति सिद्धो धर्मिग्राहकप्रमाणबाधः । अत्र वदामः । यत् तावदुक्तं मनसोऽनु-

DR.RUPNATHJI( DR.RUPAK NATH )

ल्पनव्यसनेन। **मैवम्**। तत्र तावत् करणत्वात् कर्तृवैलक्षण्यसिद्धिः। दिगाकाशादीनां प्रत्यक्षत्वात् तदवगमे (र्व्वि?) मनसः करणभूतत्वाद् दिगाकाशादिव्यतिरेकसिद्धिरपि स्वध्यवसेयेति सिद्धं दशमं मनोद्रव्यम्।

**श्रोत्रमात्रेन्द्रियग्राह्यः शब्दः शब्दत्वजातिमान्।**
**द्रव्यं सर्वगतो नित्यः कुमारिलमते मतः॥ ३०॥**

तत्र श्रोत्रग्राह्यत्वे शब्दस्य न विवादः। शब्दत्वं नाम जातिर्जातिनिर्णये वर्ण्यते च।

**वियद्गुणत्वं शब्दस्य केचिदूचुर्मनीषिणः।**
**प्रत्यक्षादिविरोधात् तद् भट्टपादैरुपेक्षितम्॥ ३१॥**

तत्र गुणस्य सर्वत्र साश्रयतया प्रतीयमानत्वादिह च निराश्रयतयैव प्रतीतिदर्शनात् प्रत्यक्षविरोधः। 'शब्दो द्रव्यं सा-(क्ष)ादक्षसम्बन्ध(कार्य? ग्राह्य)त्वात् घटवत्'। 'शब्दो द्रव्यं सत्त्वे सत्यनाश्रयत्वात् (कालवत्)'। न चास्यानाश्रयत्वमसिद्धमिति (च?) वाच्यम्। प्रतीतिविरोधाद्, 'विमतं द्रव्यं शब्दाश्रयो न भवति द्रव्यत्वात् सम्प्रतिपन्नवदि'ति निराश्रयत्वसिद्धेश्च। 'शब्दो द्रव्यं न भवति श्रोत्रग्राह्यत्वात् शब्दत्ववदि'ति साध्यमिति चेद्, न, 'शब्दो गुणो न भवति श्रोत्रग्राह्यत्वात् शब्दत्ववदि'त्येताभ्यामेव हेतुदृष्टान्ताभ्यां गुणत्वनिवृत्तेरपि सुसाधनीयत्वात्। तस्माद् द्रव्यत्वं प्रमाणान्तरावसेयम्। तच्चूक्तमेव। 'शब्दो विभुः स्पर्शानर्हद्रव्यत्वाद् अनारम्भकत्वे सत्य-

DR.RUPNATHJI( DR.RUPAK NATH )

इत्यादिषु श्वेतत्वादिगुणविशिष्टस्यैव द्रव्यस्य भूतिसाधनत्वश्रवणाद् गुणगतोऽपि कोऽप्यतिशयः कल्पनीयः । स एव गुणगता शक्तिरित्युच्यते । एवं सर्वत्र द्रष्टव्यम् । अत्र शक्तिरेव नास्तीति **तार्किकाणां** मतम् । अग्न्यादीनां दाहकत्वादिशक्तिं च स्वभावभेदेन समर्थयन्ति । **तदयुक्तम्** । स्वभावस्य यावद्द्रव्यभावित्वात् । *दाहकत्वादेश्च मणिमन्त्रादिनिराकरणेन । न च प्रतिबन्धकाभावादेव दाहक इति वाच्यम् । अभावस्य सर्वत्राप्यकारकत्वात् । न च नित्यकर्मणामकरणात् प्रत्यवायदर्शनादकारकत्वमसिद्धमिति वाच्यम् । तत्रापि नित्यकर्मभि(त्कर्मभा)वितानामज्ञातोपरिपातानामवर्जनीयानामेनसामेव प्रत्यवायहेतुत्वाभ्युपगमात् । यथाहुः —

> "स्वकाले यदकुर्वं(श्च) करोत्यन्यदचेतनः ।
> प्रत्यवायोऽस्य तेनैव नाभावेन स जन्यते ॥"

इति । कथं तर्हि विशेषज्ञानाभावस्य संशयजनकत्वमिति चेत्, तत्राभावस्य ज्ञापकत्वात् । ज्ञापकत्वकारकत्वयोश्च विशेषादिति शक्तिरवश्याश्रयणीया । **प्राभाकराः** पुनरेनामनुमानगम्यां सङ्गिरन्ते । तत्तु प्रत्यक्षतो दृष्टसम्बन्धस्यैव लिङ्गस्यानुमापकत्वमिति समर्थयद्भिरस्माभिरेवानुमानपरीक्षायां निरस्तम् । ननु कथमर्थापत्त्या शक्तिग्रहणम् । उच्यते ।

**यादृशादग्निसंयोगात् सर्वदा दाहदर्शनम् ।**
**तादृशादेव मन्त्रादिप्रयोगे (द ? तदद)र्शनात् ॥ ३९½ ॥**

---

* दाहकत्वादेर्मणिमन्त्रादिना निराकरणादिति खण्डवाक्यार्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)

मेव। नन्वन्यत्र क्लृप्तक्रिये श्येनादौ कर्मकल्पनादेव स्थाणौ संयोगवियोगयोरुपपत्तेर्न तत्र कर्मकल्पनमिति चेद्, मैवम्। श्येनस्यान्यत्र कुत्रापि क्लृप्तक्रियत्वानुपपत्तेः। तथाहि— नहि भवतामाकाशदेशसंयोगविभागयोर्दर्शनात् पतत्रिणि क्लृप्तक्रियत्वम्, आकाशदेशस्य भवतामप्रत्यक्षत्वात्। न च वियद्गततेजोवयवसंयोगविभागदर्शनात् क्लृप्तक्रियत्वम्। तत्रापि तेजोवयवानामेव श्येनावयवैः सह संयोगवियोगयोर्दर्शनात् तेजोवयवेष्वेव कर्मकल्पनप्रसङ्गात्। एवं सर्वत्र दर्शयितव्यम्। इति सकललोकप्रसिद्धस्थावरजङ्गमविभागोऽपि दत्तजलाञ्जलिरासीदायुष्मताम्। अपिच, 'अन्धकारे खद्योतः पतती'ति प्रत्ययो निरालम्बन एव भवेद्, अत्यन्तासत्त्वाद् भवतामन्धकारपदार्थस्य। न च तत्रापि खद्योतगतेनैव तेजोंशेन संयोगविभागाविति वाच्यम्। खद्योतस्य स्वगतेन तेजसा कदाचिदपि वियोगाप्रतीतेः। न च नयनस्य विपरीतस्यावलोकनानुमितदेशसंयोगविभागाभ्यां खद्योते कर्मकल्पनमिति (चेद्?वाच्यम्)। अभिमुखपतनादौ तदसम्भवात्। 'यथा देवदत्तस्य गतिपूर्विकां देशान्तरप्राप्तिमवलोक्यादित्येऽपि गतिस्मरणम्' इति भाष्यमप्युपेक्षणीयमासीद् भवताम्, उभयत्रापि कर्मणोऽनुमेयत्वे दृष्टान्तदार्ष्टान्तिकत्वेन निर्देशानुपपत्तेः। तस्मात् प्रत्यक्षेणैव कर्मसिद्धिः॥

इति मानमेयोदये

प्रमेयपरिच्छेदे कर्मनिर्णयः।

DR.RUPNATHJI( DR.RUPAK NATH )

परस्परं तादात्म्यमेव सम्बन्धः, तच्च प्रागेवोक्तम् । संशयप्रयोजनादीनामस्मिन्नन्तर्भावः स्पष्टः । प्रमाणादयो यद्यप्यत्रैवान्तर्भवन्ति, तथापि 'प्रयोजनवशाद् भेदेन कीर्तनम्' इति पदार्थषट्कवर्णनानन्तरं तैरेवानूदितं च । तस्माद् भावपदार्थानामेतेष्वेवान्तर्भावाद्, अनन्तर्भूतानां च पदार्थत्वानुपपत्तेर्युक्तमभावपदार्थनिरूपणम् ।

> प्रागभावादिभेदेन चतुर्धैव विभागवान् ।
> षष्ठप्रमाणविज्ञेयः पदार्थोऽभाव उच्यते ॥ ४६½ ॥

अभावो द्विविधः संसर्गाभावोऽन्योन्याभावश्च । तत्र संसर्गाभावः प्रागभावप्रध्वंसाभावात्यन्ताभावभेदेन त्रिविधः ।

> क्षीरे यो दध्यभावः स इह निगदितः प्रागभावः प्रवीणैः
> प्रध्वंसाभावमाहुर्दधनि तु पयसोऽभावमाचार्यपादाः ।
> अत्यन्ताभावसंज्ञो भवति हि पवनाद्येषु रूपाद्यभाव-
> श्चान्योन्याभावमाशु स्फुटयति तु घटादौ पटत्वाद्यभावः ॥

> अभावाख्यः पदार्थस्तु नास्तीत्याह प्रभाकरः ।
> घटाद्यभावस्तत्पक्षे केवलं भूतलं मतम् ॥ ४७½ ॥

तदुक्तं '(न) भावान्तरमभाव' इति । तन्मन्दम् । 'अघटं भूतलम्' 'इह भूतले घटो नास्ती'त्यादिविशिष्टव्यवहाराणां विशिष्टभूतलविज्ञानमूलत्वे तद्विशेषणभूतस्य तत्त्वान्तरस्यावश्याश्रय(णीय)त्वात् । न च भूतलवेदनादेवायं व्यवहार इति

DR.RUPNATHJI( DR.RUPAK NATH )

साम्प्रतम्। घटवति भूतलेऽपि तद्व्यवहारप्रसङ्गात्। अस्ति हि तत्रापि भूतलविज्ञानम्। **ननु** तन्मात्रज्ञानस्यैवाभावव्यवहारकारणत्वमिति चेद्, **मैवम्**। मात्रशब्दस्य भूतलातिरिक्तार्थत्वे तत्त्वान्तरत्वापत्तिः, अनतिरिक्तार्थत्वे घटवति प्रसङ्ग इति पूर्वोक्तदोषानतिवृत्तेः। न चैकाकिभूतलवेदनं तत्कारणमिति वाच्यम्। एकाकिशब्दस्यैकसङ्ख्यायोगित्वेऽर्थे घटवति प्रसङ्गः, 'एकादाकिनिच्चासहाये' (५. ३. ५२) इति द्वितीयासहायत्वेऽर्थे तत्त्वान्तरत्वापत्तिरिति घट्टकुटीप्रभातन्यायस्य पुनरप्यनतिवृत्तेः। एताभिरेव युक्तिभिः केवलादिशब्दोऽपि व्याख्यातो वेदितव्यः। अत्राह **भवनाथः** 'यत्राभावधीस्तत्र संसृष्टस्वरूपधीर्नास्ति स्वरूपधीस्त्वस्तीति द्वयी स्वरूपधीरास्थेया। तत्र संसृष्टस्वरूपधीतोऽन्या स्वरूपधीस्तन्मात्रधीः। तद्धीवेद्यं च तन्मात्रमिति न मेयान्तरम्' इति। **तत्र** प्रष्टव्यं, संसृष्टस्वरूपधीतोऽन्यस्याः स्वरूपधियः किं प्रमेयमिति। ननूक्तमेव तद्धीवेद्यं च तन्मात्रमिति, तर्हि मात्रशब्दस्य भूतलातिरिक्तार्थत्वे तत्त्वान्तरत्वम्, अनतिरिक्तार्थत्वे घटवति प्रसङ्गः। **ननु** घटवति संसृष्टस्वरूपधीरेवेति न तत्र प्रसङ्ग इति चेद्, **न**। उक्तया रीत्या स्वरूपधीद्वयस्यापि तत्रैव प्राप्तत्वादिति न प्राचीनदोषादुत्तारः। तस्मादभावो नाम तत्त्वान्तरमवश्याश्रयणीयम्। अतः पञ्चैव पदार्थाः। **ननु** शून्यमेवेदं जगदिति वादिनि माध्यमिके जीवति सति कथं पदार्थपञ्चकविभागसिद्धिः। एवं हि स वदति 'सर्वं ज्ञानं शून्यविषयं ज्ञानत्वात् स्वप्नादिज्ञानवदि'ति। **ननु** तत्रापि विज्ञानमस्त्येवेति कथं जगतः शून्यात्मकत्वमिति

DR.RUPNATHJI( DR.RUPAK NATH )

चेद्, **मैवम्** । ज्ञेयाभावे ज्ञानस्याप्यभावात् । अतः शून्यविवर्तं जगदिति माध्यमिकेनोक्तं ज्ञानाभावमसहमानो **योगाचारः** प्रत्यवतिष्ठते । अस्तु ज्ञेयाभावः । स्वप्नादौ ज्ञेयानामत्यन्ताभावे सत्यपि प्रतीयमानत्वात् तद्दृष्टान्तेन विमतानामप्यत्यन्ताभावस्य सम्यगवगम्यत्वात् । ज्ञानं तु न निराकर्तुं शक्यं, स्वप्नादावपि ज्ञानोदयदर्शनात् । न च ज्ञेयाभावेन ज्ञानाभावोऽपि कल्पनीयः, प्रतीतिविरोधात् । तस्माद् विज्ञानमेव जाग्रत्प्रपञ्चघटादिरूपेण परिवर्तते । समनन्तरप्रत्ययेन च तदेव गृह्यते । तस्माद् दृश्यमानं घटाद्याकारं विज्ञानस्यैव । अपिच स्वयंप्रकाशरूपाद् विज्ञानादभिन्ना एव घटादयः । तथाच प्रयोगः — यत् प्रकाशते तत् प्रकाशादभिन्नं यथोभयसिद्धः प्रदीप' इति । तस्माद् विज्ञानविवर्तं जगदिति **योगाचारेण** साधिते बाह्यवस्तुनिरासमसहमानः **सौत्रान्तिकः** प्रत्यवतिष्ठते । अस्तु ज्ञानमसाकारं, तथापि न बाह्यमर्थमपह्नोतुं शक्यं, बाह्यपदार्थानामेकरूपस्य विज्ञानस्याकारसमर्पणं प्रति हेतुत्वादेकरूपमेव विज्ञानं नीलपीताद्याकारेण बहुधा विपरिवर्तत इति दुरुपपादमेव । तस्माद् विज्ञानाकाराणामनेकविधत्वदर्शनात् तत्तदाकारसमर्पणहेतुभूताः क्षणिकतरा बाह्यपदार्था अपि ज्ञानाकारविशेषदर्शनानुमेयाः । न च बाह्यपदार्थानां सर्वत्रानुमेयत्वे प्रत्यक्षानुमानविभागभङ्गप्रसङ्ग इति वाच्यम् । यस्य साक्षादाकारसमर्पणहेतुत्वं तस्य प्रत्यक्षत्वं, यस्य तु परम्परया तस्यानुमेयत्वमिति विभागात् । अथ बाह्यार्थस्य नित्यानुमेयतावचनमसहमानो **वैभाषिकः** प्रत्यवतिष्ठते । कथं नीलादिद्रव्यं विज्ञानानामाकारं समर्पयति,

DR.RUPNATHJI(DR.RUPAK NATH)

णत्वाद्, विज्ञानस्यापि द्वित्रक्षणावस्थायित्वाङ्गीकारेण दृष्टान्तासिद्धेश्च। अत्र पुनराभिरेव युक्तिभिः प्रत्यक्षादिप्रमाणसिद्धानां पदार्थानां मिथ्यात्वमौपनिषदाः साधयन्ति। 'प्रपञ्चो (दृ?) मिथ्या दृश्यत्वात् स्वप्नप्रपञ्चवदि'ति। 'नेह नानास्ति किञ्चन' (बृ. ४. ४. १९) इत्यादिवेदान्तवाक्यं चात्र प्रमाणम्। अतः प्रत्यक्षादिप्रमाणसिद्धस्य प्रपञ्चस्य मिथ्यात्वाद् 'एकमेवाद्वितीयं ब्रह्म' (छा. ६. २. १) इत्यादिवेदान्तवाक्यानां यथाश्रुतेऽर्थे प्रामाण्यमविहतमिति। **अत्र वदामः**। तत्र यत् तावदुक्तं दृश्यत्वान्मिथ्यात्वमिति, तत्र किमिदं मिथ्यात्वं नाम? किमत्यन्तासत्त्वम्, उत सदसद्विलक्षणत्वं, बाध्यत्वं वा। नाद्यः, अत्यन्तासतो नरविषाणादेरिव ख्यानानुपपत्तेः। नापि सदसद्विलक्षणत्वं, तस्यान्यत्राप्रसिद्धत्वेन पक्षस्याप्रसिद्धविशेषणत्वापत्तेः। **ननु** सर्ववादिसिद्धमेव स्वप्नादिप्रपञ्चस्य सदसद्विलक्षणत्वम्। तथाहि—असतो नरविषाणादेरिव ख्यानानुपपत्तेः सतश्चिदात्मन इव बाधानुपपत्तेः सिद्धं स्वप्नादिप्रपञ्चस्य सदसद्विलक्षणत्वम्। **मैवम्**। सद्विलक्षणस्य नरविषाणादेरिव ख्यानानुपपत्तेः असद्विलक्षणस्य चिदात्मन इव बाधानुपपत्तेः सदसद्विलक्षणत्वकल्पनेऽपि स्वप्नादिप्रपञ्चस्य ख्यातिबाधयोरनुपपत्तेः। तस्मात् ख्यातिबाधान्यथानुपपत्त्या सदसद्विलक्षणत्वमिति रिक्तं वचः। अतः सदसद्विलक्षणत्वमस्माकमसिद्धमेवेति युक्तमप्रसिद्धविशेषणत्वम्। नापि बाध्यत्वं मिथ्यापदार्थः, जाग्रत्प्रपञ्चस्य बाधकभूतप्रमाणान्तरादर्शनात्। न चेदमेवानुमानं बाधकमिति वाच्यम्। अस्यानुमानस्य प्रपञ्चप्रतिभासबाध्यत्वेन वह्निशैत्यानु-

DR.RUPNATHJI( DR.RUPAK NATH )

